# Skandakritam Shiva Ashtakam

# स्कन्दकृतं शिवाष्टकम्

## Document Information

Text title : Skandakritam Shiva Ashtakam

File name : shivAShTakamskandakRRitaM.itx

Category : shiva, shivarahasya, aShTaka

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 10 | 3-10||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# स्कन्दकृतं शिवाष्टकम्

जय जय मङ्गलतरसुन्दरतममङ्गलापते
जय जय विश्वविधानसंस्थितिनिध(धा)नशिक्षणचण
बन्धुतरसुन्दर(सिन्धुर)वरकृत्तिवसन मुनिवृन्दविनुत
निन्दितमखसंहृते सुरनन्दितगणपुरमारक
भवशोषणगरलाशन शमनभयकम्पितमुनिपोतकशरण
अरुणाधिपकरुणाकर जनतारणतरणिस्थित
सुरकारणमारशोषण त्रिगुणनिगमगणपोषणचरण
शरणं भव शरणं भव शरणं भव दयया ॥ १॥

निगमागमवचनातिग यमिमानसगगनान्तर
वयुनस्थितिसुरकारण मारशोषण
भवनाशन वरहारक दहनामलनयन
मननातिग वृषवाहनगमन भवनाशन वसिताशक
सुरभूसुरनिकरावन पितृकाननविहृते दहराकृतिकुहरातिग
वरभूधरशयन खरशीतजकरसंस्थित मुरभेदनशरधारण
पुरनाशन निगमव्रजतुरगोत्तम उरगाधिपकृतशिञ्जिनिवरकार्मुक
मृगधृक् कुलिशायुधमुखदैवतभटरक्षणचतुर
शरणं भव शरणं भव शरणं भव दयया ॥ २॥

दहनानिलतपनामरवरभूसुर जलनायक
शमनाकृतविनतेकलिताखिलचरजङ्गम जगतामवन (जनतावन)
जननादिक ललितोत्तमचरित भरितानतवरतात जनतापहृते
विनतात्मजवाहनार्चन जनितातुलदयया
विकचाम्बुजनिभलोचनरथसंवहनप्रद
विधिमौलिजफलकामलशयभूषित भगवन्
पवनानलवलमारणबलशोषण तृणचालनमपि कृते
कृणुते न हि निखिलागमशिरसंस्तुतचरित

शरणं भव शरणं भव शरणं भव दयया ॥ ३॥

व(क)रुणालयमथनोद्भवगरलोत्थितमहसा सुरकिन्नरहरवलानहरिसायकरभसा
(सुरकिन्नरहरवग्लनहरिसायकरभसा, सुरकिन्नरपरिपालनहरिसायकरभसा)
कवलीकृतगरसम्भवनलिनामलशुभकन्धर जलदोपम भगवन्
मधुमारणनयनामलनलिनार्चित
पदपङ्कजलुलिताम्बुधिचुलुकीकृतघटसम्भवनुतितोषित
यतिमानसवरभूषण फणिकङ्कण भगवन्
दुरितापह चलितामललिलितेन्दुकलालवविमलीकृतजगते
शरणं भव शरणं भव शरणं भव दयया ॥ ४॥

मखसन्मुखहवनाशन मुखतर्पितहविभक्षण विबुधव्रजनलिनोत्थित
महिमातिग परिपूजनरहितातुलमन्युकृतेमननोत्थित
गणगर्जनपरितर्जनसुरभर्जन विधिनन्दनकृतशिक्षण
परिपूरितदुरिवान्तक गजमारणकरण
अगजाधिप भुजगाधिपशयनार्पित विधिमौलिजकलितस्त्रज
बलभिन्मतभगदैवतनयनाम्बुजनाशकृते
शरणं भव शरणं भव शरणं भव दयया ॥ ५॥

जटिलालक मृगनायकमदपाटन जनिताम्बरकटिशोभित
व(त)टसंस्थित निगमागमभटगोषक(घोषित) सुरनायकत्रुटिताखिल
जगदुद्भवघटकर्पर हरिशर(हरिसायक) ((बल))कर्षण पुरदाहन भगवन्
पटुताकृतिनिखिलस्थितिकटुकीभव(कृत)जलधे
भवदागमजगदुद्गम(द्भव)जलदालयवहन
त्रिपुरान्तक शमितान्तक शमितान्धक शमिताखिलदुःख विभो
शरणं भव शरणं भव शरणं भव दयया ॥ ६॥

पवनाशनमणिकङ्कणगरलाशन मधुसूदनबलनाशन यमुनानुजभवनाशन
सिकताशनतनयामल गणसत्तम गुणबन्धुर हृदयानन मुनिसत्तम
विनुतगण(गुण)गर्जितवदनायित शशिधामककृतनेत्रक
उडुनायकशिखरामर वरनायककुमुदाकर
समुदायजततलोचन द्विरदाननसुतहर्षदतरुणेन्दुललाम
मसृणारुणनखजोत्पल कलिकायितसुरजालकमकुटीतटघटिताम्बुजपाद
शरणं भव शरणं भव शरणं भव दयया ॥ ७॥

अखिलाण्डजशुकतुण्डजघटनोत्थित मधुरायितसुखतन्द्रिजरससारस
पदनामजमुनिगीतविनोद कनकाम्बुजजनिताखिलजग(जन)खण्डन
यमदण्डन शशिखण्डन कलितामलशिरसे
मृदुमण्डित उरगेश्वरकृतकुण्डलविधिखण्डन
शिखण्डवरलोचन (शिखिडम्बरकृतलोचन) वडवानलकृतजिह्वक
शिखिवाहनकृतबोधन श्रुतिमण्डलशिरसे
पुरदण्डन नगकोदण्डजहरिशरकर्षणाखण्डलकरभञ्जन
मुनिमण्डलकृतरक्षणखण्डपरशो तण्डुनन्दिगणभृङ्गिचण्डिकृततालमद्दलज
घुङ्घुमध्वनि((ज))मड्डुघर्घरितरङ्गनाट्यपर जह्नुजाविततनीरतीरविलसच्छिवलिङ्ग
शरणं भव शरणं भव शरणं भव दयया ॥ ८॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये स्कन्दकृतं शिवाष्टकम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः १० । ३-१०॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 10 . 3-10..

Notes:
Skanda स्कन्द eulogizes Aṣṭākṛti Śiva अष्टाकृति शिव with Aṣṭakam अष्टकम् - an eight stanza composition.
The shloka numbers have been renumbered for convenience of the reader.

Encoded and proofread by Ruma Dewan

*Skandakritam Shiva Ashtakam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*